**SET-I**

Sanskrit - II | Date :
3 hours Exam | Max. Marks : 100

**I) एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत।** **1x 8 = 8 m**

अ) परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।।

आ) प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति।।

**II) एकं निबन्धप्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) विभीषणोपदेशः इति पाठ्यभागसारांशं लिखत।

आ) मातृ भीमेः वैभवं कविः कथं प्रशशंस?

**III) एकं निबन्धप्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) मन्दविषसर्पकथां संङ्ग्रहेण लिखत।

आ) भिषजः भैषज्यम् इति पाठ्यभागस्य सारांशं संक्षेपेण लिखत।

**IV) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) कर्णभारं केन विरचितम्? आ) नृपश्रियः कीदृशाः?

इ) द्रोण दृपदयोः सम्बन्धः कीदृशः? ई) केन दृपदः गर्वान्धः जातः?

उ) कालिदासेन उक्तस्य श्लोकस्य भावः कः? ऊ) कालिदासः महाराजं कथं सन्तोषितवान्?

**V) द्वयोः ससन्दर्भं व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) परेषां सहसावज्ञा न कर्तव्या कथञ्चन।

आ) चित्रार्पितारम्भ इवाऽवतस्थे।

इ) यत्रैताः हृदि जागृताः प्रकृतयः सा मातृभूमिर्मम।

ई) सा संस्कृताख्या सुकृतैकलभ्या।

**VI) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) मृत्युर्वै प्राणिनां ध्रुवः।

आ) सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना।

इ) वैद्योऽपि मानव एव।

ई) अप्पय्यः असाधारणः वादे जेतुमशक्तः।

**VII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) कदा प्रभृति अशुभानि निमित्तानि दृश्यन्ते?

आ) सुदक्षिणादिलीपौ किमर्थं नन्दिनीधेनोः सेवां अकुरूताम्?

इ) सर्वेन्द्रियाणां प्रधानां किम्?

ई) परोपदेशसमये जनाः सर्वेऽपि कीदृशाः भवन्ति?

उ) मानवानां प्रकृति शुभगुणाः के? ऊ) संस्कृताख्या वाणी कीदृशी?

**VIII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) मन्दविषो नाम सर्पः ''कुत्र'' वसति?

आ) ब्राह्मणं प्रति तत्प्रेयसी किं जगाद?

इ) राजहंसः कः? तस्य नगरी का?

Visit CollegeDekho

ई) श्रीधरः स्वमातुः मरणसमये किं कुर्वन्नासीत्?

अ) वेङ्कटरावस्य पिता कः?

ऊ) अप्पय्यदीक्षितः कुत्र जन्म लेभे?

**IX) *एकेन वाक्येन समाधानं दत्त।*** **5 x 1 = 5 m**

अ) रघुवंशमहाकाव्यं केन विरचितम्?

आ) रणे रामेण कः हतः?

इ) सर्वत्र का पूज्यते?

ई) मूर्खस्य कति चिह्नानि भवन्ति?

उ) सर्वासु सुतासु कस्याः गुणाः भवन्ति

**X) *एकेन वाक्येन समाधानं दत्त।*** **5 x 1 = 5 m**

अ) कौण्डिन्यस्य पुत्रः कः?

आ) देवदत्तः राजानं कुत्र आनीनयत्?

इ) राजवाहनः कस्य पुत्रः?

ई) श्रीधरस्य ज्येष्ठभ्रातृवत् कः वर्धते

उ) अप्पय्यदीक्षित इति पाठ्यांशस्य रचयित्री का?

**XI) *अधो निर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त।*** **5 x 1 = 5 m**

अस्ति करिमंश्चित् पर्वतैकदेशे महान् वृक्षः। तत्र च सिन्धुकनामा कोडपि पक्षी प्रतिवासति स्म। तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित् तमुद्दिश्य व्याधःकोऽपि समाययौ। स च पक्षी तदग्रत एव पुरीषमुत्ससर्ज। अथ पतनसमकालमेव तत्सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्। अहो-मम शिशुकालादारभ्य शकुनि बन्ध-व्यसनिनोऽशीति वर्षाणि समभूवन्। न च कदाचित्पक्षिपुरीषे सुवर्णं दृष्टम् इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध।

**प्रश्नाः**

(अ) वृक्षे प्रतिवसतः पक्षिणो नाम किम्

(आ) कस्मिन् सुवर्णमुत्पद्यते?

(इ) पक्षिणा मुद्दिश्य कः समाययौ

(ई) स पक्षी कुत्र पुरीषमुत्ससर्ज?

(उ) व्याधः वृक्षे कं बबन्ध?

**XII) *नामनिर्देशपूर्वकं त्रीणि सन्धत्त।*** **3 x 2 = 6 m**

अ) शरत् + चन्द्रः  आ) रामस् + टीकते  इ) वाक् + ईशः

ई) वाक् + मयम्  उ) शिवः + अहम्  ऊ) कविः + आयाति

**XIII) *नामनिर्देशपूर्वकं त्रीणि विघटयत।*** **3 x 2 = 6 m**

अ) सच्चिदानन्दः  आ) तट्टीका इ) अजन्तः  ई) तन्मात्रम् उ) सोऽपि  ऊ) पितुरिच्छा

**XIV) *द्वयोः शब्दयोः सविभक्तिंरूपाणि लिखत।*** **2 x 6= 12m**

(अ) जलमुक्  (आ) स्त्रक्  (इ) महत्  (ई) यद् (पुं)

**XV) *समासनामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत।*** **3 x 2= 6m**

(अ) अहिंसा  (आ) अल्पवातः  (इ) त्रिलोकी  (ई) कंसकृष्णौ

(उ) प्रत्यक्षम्  (ऊ) नीलोज्वलवपुः

**XV) *अधोनिर्दिष्टपट्टिकामाधारीकृत्य पञ्च साधुवाकयानि लिखत*** **5 x 1 = 5m**

| | | |
|---|---|---|
| शिवः | फलं | खादामि |
| सः | पाठं | पटसि |
| अहं | चित्रं | पश्यति |
| त्वं | देवं | पिबति |
| गीता | क्षीरं | पूजयति |

**SET-II**

Sanskrit - II
3 hours Exam

Date :
Max. Marks : 100

**I) एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत।** **1x 8 = 8 m**

अ) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभा ितम्।
मूढैः पा ाणखण्डे ु रत्नसंज्ञा विधीयते।।

आ) उद्यमं साहसं धैर्यं बुध्दिः शक्तिः पराक्रमः।
डेते यत्र तिष्ठन्ति तत्र देवः सहायकृत्।

**II) एकं निबन्धप्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) धर्मनिष्टा इति पाठ्यांशस्य सारांशं संक्षेपेण लिखत।

आ) गीर्वाणवाण्याः वैभवं लिखत।

**III) एकं निबन्धप्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) विक्रमस्य औदार्यमिति पाठ्यभागस्य सारांशं लिखत।

आ) अप्पय्यदीक्षितस्य जीवितचरितं संक्षेपेण लिखत।

**IV) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) कीदृशं वस्तु तयैव तिष्ठति? आ) भृगुवंश केतुः कः?

इ) बालानां कलहः कीदृशः? ई) कृपी गोक्षीरं ददामीत्यकत्वा पुत्राय किं दत्तवती?

उ) भोजःकोशाध्यक्षं प्रति किं सूचितवान् ऊ) कालिदास श्लोके भोजेन प्राप्तं समाधानं किम्?

**V) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) वदेत् क्षमं स्वामिहिंत च मन्त्री।

आ) राज्येन किं तद्विपरीतवृत्तेः, प्राणैः उपक्रोशमलीमसैर्वा।

इ) विद्यायत्र परोपकार विभवाः सा ज्ञान भूमिर्मम।

ई) वाच्याः कथं मातृपदेन चान्याः।

**VI) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) निवृत्तरागस्य गृहं तपोवनम्।

आ) यःकृतमुपकारं विस्मरति स एव पुरू ाधमः।

इ) क्षणे क्षणे किल परिक्षीयते बालस्य दशा।

ई) राजा तं कनकाभि ेकेण सत्कृतवान्?

**VII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) सीता कीदृशी?

आ) दिलीपेन सेव्यमानं नन्दिनीधेनुं कः चक ?

इ) पृथिव्यां त्रीणि रत्नानि कानि?

ई) अस्पृशन्नेव वित्तानि कः परेभ्यः प्रयच्छति?

उ) देवगिरीणां पञ्च नामानि लिखत। ऊ) अमर्त्यवाण्याः मातृता कथमागता?

**VIII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) कौण्डिन्येन मन्दवि : किमिति शप्तः?

आ) ब्राह्मणं पुत्रप्राप्त्यर्थं कीदृशं व्रतमाचरितवान?

Visit CollegeDekho

इ) मानसारः कथं गदां प्राप्तवान्?

ई) मार्गशीर्षमासः कीदृशः आसीत्?

अ) प्रभुत्वचिकित्सालये नियोगेनागता भिषङ्गना का? ऊ) सत्नखेटि श्रीनिवासस्य अभिलाषा का?

**IX) *एकेन वाक्येन समाधानं दत्त।*** **5 x 1 = 5 m**

अ) केषां बलानि अमेयानि? आ) दिलीपस्य धर्मपत्नी का?

इ) यावज्जीवं कः दडेत्? ई) केन सर्वे वशाः भवन्ति?

उ) चिरसाम्प्रदाय रूचिराः के?

**X) *एकेन वाक्येन समाधानं दत्त।*** **5 x 1 = 5 m**

अ) मण्डूकनाथः कः? आ) कुमारमानीय राज्ञे कः ददौ?

इ) राजहंसस्य पत्नी का? ई) अपर्याप्तः समयः इति पाठ्यंभागःकेन विरचितः?

उ) वेङ्कटरावस्य पुत्रः कः?

**XI) *अधो निर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त।*** **5 x 1 = 5 m**

कस्मिंश्चित् वनोद्दशे करालकेसरो नाम सिंहः प्रनिवसति स्म। तस्य धूसरको नाम सृगालः सदैवानुयायी परिचारिकोऽस्ति। अथकदाचित् तस्य हस्तिना सह युध्यमानस्य शरीरे गुरूतराः प्रहाराः सञ्जाताः यैः पदमेकमपि चलितुं न शक्नोति। तस्य अचलनाच्च धूसरकः क्षुत्क्षामकणठो दौर्बल्यं गतः। अन्यस्मन्नहनि तमवोचत् - ''स्वामिन्! बुभुक्षया पीडितोऽहम्। पदात्पदमपि चलितुं न शक्नोमि। तत्कथं ते शुश्रूषां करोमि।'' सिंह आह - ''भोः! गच्छा अन्वेषय किञ्चित् सत्वम्। येनेमाम् अवस्थां गतोऽपि व्यापदयामि''

**प्रश्नाः**

(अ) सिंहस्य नाम किम् (आ) परिचारकः कः?

(इ) धूसरकः सिंहं प्रति किम् अब्रवीत्? (ई) सृगलः येन सह युध्दं कृतवान्?

(उ) सिंहः श्रृगालं प्रति किमाह?

**XII) *नामनिर्देशपूर्वकं त्रीणि सन्धत्त।*** **3 x 2 = 6 m**

अ) मनस् + चलति आ) उत् + डयनम् इ) षट् + आननः

ई) जगत् + नाथः उ) कः + अपि ऊ) नृपतिः + गच्छति

**XIII) *नामनिदेश पूर्वकं त्रीणि विघटयत।*** **3 x 2 = 6 m**

अ) सज्ञनः आ) पेष्टा इ) तदपि ई) षण्मुखः उ) रामोऽपि ऊ) हरिर्गच्छति

**XIV) *द्वयोः शब्दयोः सविभक्तिंरूपाणि लिखत।*** **2 x 6= 12m**

(अ) वणिक् (आ) वाक् (इ) पचत् (ई) यद् (स्त्री)

**XV) *समासनामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत।*** **3 x 2= 6m**

(अ) उत्तरकायः (आ) मयूरव्यंसकाः (इ) त्रिभुवनम् (ई) रामलक्ष्मणौ (उ) यथाशक्ति

(ऊ) महाबलः

**XV) *अधोनिर्दिष्टपट्टिकामाधारीकृत्य पञ्च साधुवाकयानि लिखत*** **5 x 1 = 5m**

| | | |
|---|---|---|
| रमेशः | फलं | गच्छति |
| गोविन्दः | किमर्थं | करोति |
| त्वं | कुत्र | पठामि |
| रामः | कदा | वसति |
| अहं | | पिबसि |

Visit CollegeDekho

**SET-III**

Sanskrit - II | Date :
3 hours Exam | Max. Marks : 100

**I) एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत।** **1x 8 = 8 m**

अ) तक्षकस्य वि ˙ दन्ते मक्षिकायास्तु मस्तके।
वृश्चिकस्य नि ˙ पुच्छे सर्वाङ्गे दुर्जने वि म्।।

आ) अर्थानामर्जनं कार्यं वर्धनं रक्षणं तथा।
भक्ष्यमाणो निरादायः सुमेरूरपि हीयते।।

**II) एकं निबन्ध प्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) रावणाय विभी णेन कृतमुपदेशं लिखत।

आ) सा मातृभूमिर्मम इति पाठ्यभागसारांशं लिखत।

**III) एकं निबन्ध प्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) ''मन्दवि सर्पकथा'' इति पाठ्यभागस्य सारांसं लिखत।

आ) वेङ्कटरावस्य स्वभावं संग्रहेण लिखत।

**IV) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) नृपश्रियः कीदृशाः? आ) केन दृपदः गर्वान्धः जातः?

इ) कालिदासः महाराजं कथं सन्तोितवान्? ई) कर्णभारं केन विरचितम्?

उ) द्रोण दृपदयोः सम्बन्धः कीदृशाः? ऊ) कालिदासेन उक्तस्य श्लोकस्य भावः कः?

**V) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।

आ) पिण्डेष्वनास्था खलु भौतिके ु।

इ) ग्रामे यत्र गृहे समैक्य परता सा धर्म भूमिर्मम।

ई) भृत्याहि पक्त्री वद किं न सा स्त्री।

**VI) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) सतां सङ्गो हि भे जम्।

आ) नैवाश्रिते ु महतां गुणदो चिन्ता।

इ) विवाहो नाम वणिग्व्यहार एव।

ई) अप्पय्यः साक्षात् परमशिवस्य अवतारः।

**VII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) नराः कः इव रणे सीदन्ति?

आ) धर्मनिष्ठा इति पाठ्यांशः कस्मात् संगृहीतः?

इ) व्याधितस्य मित्रं किम्?

ई) देवः कुत्र सहायकृत् भवति?

उ) सर्वप्राणिनां उपकारकारि किम्? ऊ) लोकेचित्रमतिः कः?

**VIII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) हितोपदेशे कति भागाः सन्ति? ते च के?

आ) विक्रमेण पृष्टः भृत्यः किमुत्तरमदात्।

Visit CollegeDekho

इ) मानसारः कथं गदां प्राप्तवान्?

ई) वैद्य श्रीधरं प्रति किं उक्तवान्?

उ) मञ्जुहासिनी का?

ऊ) अपय्यदीक्षितः आन्ध्रभाषां कथं प्रशशंस?

**IX) एकेन वाक्येन समाधानं दत्त।** **5 x 1 = 5 m**

अ) सुखधर्मनाशनं केन भवति?

आ) मुनिहोमधेनुः का?

इ) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

ई) अनुष्ठानसमये मुनयोऽपि कीदृशाः भवन्ति?

उ) ''सा मातृ भूमिर्मम'' इति पाठ्यभागः केन विरचितः?

**X) एकेन वाक्येन समाधानं दत्त।** **5 x 1 = 5 m**

अ) हितोपदेशः केन विरचितः?

आ) विक्रमार्खचरितं केन विरचितम्?

इ) दशकुमारचरितं केन विरचितम्?

ई) श्रीधरस्य मातुः नाम किम्?

उ) वेङ्कटरावस्य पत्नी का?

**XI) अधो निर्दिष्टकथां पठित्वा प्रश्नानां समाथानानि दत्त** **5 x 1 = 5 m**

चित्रकूटपर्वत निकटतपोवनमध्ये मनोहरः कश्चित् देवालयेऽस्ति। तत्र च पर्वते अत्युदग्रात् शिखरात् विमला कापि जलधारा पतति। तत्र स्नानमात्रेण महापातकादीन्यपि नश्यन्ति। किञ्च, यतु पापीयान् स्नानमाचरति तस्य देहात् अतीव कलुषमुदकं निस्सरति, तेन सः पूतो भवति। अन्यच्च तत्र कश्चित् बाह्मणो महति होमकुण्डे प्रतिदिनं होमं करोति। न जाने तस्य कति वत्सरा गता इति। प्रतिदिनं कुण्डाद्बहिः प्रेरितं भस्म पर्वताकारम् अस्ति। स केनापि न भाषते। एवमतिविचित्रं स्थानमद्राक्षीदयं जनः।

**प्रश्नाः**

(अ) देवालयः कुत्र अस्ति?

(आ) जलधारा कस्मत् पतति

(इ) प्रतिदिनं होमकण्डे कः होमं करोति?

(ई) जनः कीदृशं स्थानमद्राक्षीत्

(उ) कस्य देहात् अतीव कलुषमुदकं निस्सरति?

**XII) नामनिर्दैशपूर्वकं त्रीणि सन्धत्त।** **3 x 2 = 6 m**

अ) शरत् + चन्द्रः आ) तत् + टीका इ) अच् + अन्तः

ई) तत् + मात्रम् उ) सः + अपि ऊ) पितुः + इच्छा

**XIII) नामनिर्देश पूर्वकं त्रीणि विघटयत** **3 x 2 = 6 m**

अ) जगज्जननी आ) उड्डयनम् इ) षडाननः ई) जगन्नाथः उ) कोऽपि ऊ) नृपतिर्जयति

**XIV) द्वयोः शब्दयोः सविभक्तिंरूपाणि लिखत** **2 x 6= 12m**

(अ) भवत् (आ) सम्पद् (इ) मनस् (ई) यद् (न.पुं)

**XV) समासनाम निर्देशपूर्वकं त्रयाणां विग्रह वाक्यानि लिखत** **3 x 2= 6m**

(अ) कृष्णाश्रितः (आ) स्नातानुलिप्ताः (इ) नवरात्रम् (ई) शिवकेशवौ (उ) शाकप्रति (ऊ) द्वित्राः

**XV) अधोनिर्दिष्टपट्टिकामाधारीकृत्य पञ्च साधुवाक्यानि लिखत** **5 x 1 = 5m**

| | | |
|---|---|---|
| गणेशः | सत्यं | खादिष्यति |
| कृष्णः | फलं | करिष्यति |
| त्वं | ग्रामं | पठिष्यामि |
| रामः | कदा | वदिष्यति |
| अहं | पाठं | गमिष्यसि |

Visit CollegeDekho

**SET-IV**

Sanskrit - II | Date :
3 hours Exam | Max. Marks : 100

**I) एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत।** **1x 8 = 8 m**

अ) दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।
अभ्यासेन न लभ्यन्ते चत्वारः सहजाः गुणाः।।

आ) परोपदेशसमये जनाः सर्वेऽपि पण्डिताः।
तदनुष्ठानसमये मुनयोऽपि न पण्डिताः।।

**II) एकं निबन्ध प्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) क्षितीशेन वसिष्ठधेनुः कथं आराधिता? विशदयत।

आ) पाठ्यभागमनुसृत्य गीर्वाणवाण्याः सारांशं लिखत।

**III) एकं निबन्ध प्रश्नं समाधत्त।** **1 x 6 = 6 m**

अ) भोजराजाय सालभञ्जिकया उक्तं विक्रमस्य औदार्यं लिखत।

आ) अप्पय्यदीक्षितेन्द्र इति पाठ्यभागसारांशं संग्रहेण विवृणुत।

**IV) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) कीदृशं वस्तु तथैव तिष्ठति? आ) बालानां कलहः कीदृशः?

इ) कालिदासः श्लोके भोजेन प्राप्तं समाधानं किम् ई) भृणुवंश केतुः कः?

उ) कृपी गोक्षीरं ददामीत्युक्त्वा पुत्राय किं दत्तवती? ऊ) भोजः कोशाध्यक्षं प्रति किं सूचितवान्?

**V) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) वदेत् क्षमं स्वामिहितं च मन्त्री।

आ) चित्रार्पितारम्भ इवाऽवतस्थे

इ) विद्यायत्र परोपकार विभवाः सा ज्ञान धर्म भूमिर्मम।

ई) सा संस्कृताख्या सुकृतैकलभ्या।

**VI) द्वयोः ससन्दर्भ व्याख्यानं लिखत।** **2 x 3 = 6 m**

अ) निवृत्तरागस्य गृंह तपोवनम्।

आ) सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना

इ) विवाहो नाम वणिग्व्यवाहार एव।

ई) अप्पय्यः असाधारणः वादे जेतुमशक्तः

**VII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) संसकृताख्या वाणी कीदृशी?

आ) देवणिरीणां पञ्च नामानि लिखत?

इ) देवः कुत्र सहायकृत् भवति?

ई) सर्वेन्द्रियाणं प्रथानं किम्?

उ) धर्मनिष्ठा इति पाठ्यांशः कस्मात् संगृहीतः? ऊ) सीता कीदृशी?

**VIII) त्रयाणां प्रश्नानां समाधानानि लिखत।** **3 x 2 = 6 m**

अ) अप्पय्यदीक्षित, कुत्र जन्म लेभे?

आ) मञ्जुहासिनी का?

Visit CollegeDekho

इ) मार्गशीर्षमासः कीदृशः आसीत्?

ई) राजहंसः कः? तस्य नगरी का?

उ) ब्राह्मणः पुत्र प्राप्यर्थं कीदृशं व्रतमाचरितवान्? ऊ) मन्दविषो नाम सर्पः ''कुत्र'' वसति?

**IX) *एकेन वाक्येन समाधानं दत्त।*** **5 x 1 = 5 m**

अ) देहे सदा प्राण इव का अस्ति? आ) पापहारा नदी का?

इ) चित्रविंशतिः इति पाठ्यभागः कस्मात् स्वीकृतम्? ई) मूर्खस्य कति चिह्नानि भवन्ति?

उ) यावज्जीवं कः दहेत्?

**X) *एकेन वाक्येन समाधानं दत्त।*** **5 x 1 = 5 m**

अ) अप्पय्य दीक्षितः कस्य पुत्रः? आ) भिषजः भैषज्यम् इति पाठ्यांशः केन विरचितम्?

इ) श्रीधरस्य ज्येष्ठ भ्रातृवत् कः वर्धते? ई) देवदत्तः राजानं कुत्र आनीनयत्?

उ) अप्पय्यदीक्षितः चतुर्दशविद्याः कस्मात् अधीतवान्?

**XI) *अधो निर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त*** **5 x 1 = 5 m**

अस्ति मगधदेशे चम्पकवतीनाम अरण्यानी। तस्यां चिरात् महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेन अवलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत् आह ''कथम् एतन्मांसं सुललितं भक्षयामि? भवतु। विश्वासं तावदुत्पादयामि'' इत्यालोच्य उपसृत्य अब्रवीत् - ''मित्र कुश्लंते'' इति। मृगेणोक्तम्. ''कस्त्वम्''? इति।स ब्रूते- ''क्षुद्रबुध्दिर्नाम जम्बुकोऽहम्। अत्र आरण्ये बन्धुहीने मृतवत् एकाकी निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धु र्जीव लोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया भवितव्यम्''। मृगेणोक्तम्'' ''एवमस्तु'' इति।

**प्रश्नाः**

(अ) चम्पकवतीनाम अरणयानी कुत्र अस्ति? (आ) मृगकाकौ कथं निवसतः?

(इ) मृगः केन अवलोकितः? (ई) जम्बुकस्य नाम किम्?

(उ) शृगालः मृगं दृष्ट्वा किमचिन्तयत्?

**XII) *नामनिदैशपूर्वकं त्रीणि सन्धत्त।*** **3 x 2 = 6 m**

अ) षट् + मुखः आ) रामः + अपि इ) हरिः + गच्छति

ई) जगद् + जननी उ) पेस् + टा ऊ) अच् + अन्तः

**XIII) *नामनिदैश पूर्वकं त्रीणि विघटयत*** **3 x 2 = 6 m**

अ) शरच्चन्द्रः आ) रामष्ठीकते इ) वाणीशः ई) वाङ्मयम् उ) शिवोऽहम् ऊ) कविरायाति

**XIV) *द्वयोः शब्दयोः सविभक्तिंरूपाणि लिखत*** **2 x 6= 12m**

(अ) राजन् (आ) सरित् (इ) जगत् (ई) एतद्

**XV) *समासनाम निर्देशपूर्वकं त्रयाणां विग्रह वाक्यानि लिखत*** **3 x 2= 6m**

(अ) विद्यानिपुणः (आ) लतातन्वी (इ) सप्तर्षयः (ई) धर्मार्थकामाः (उ) उपदशाः (ऊ) व्याघ्रभीतः

**XV) *अधोनिर्दिष्टपट्टिकामाधारीकृत्य पञ्च साधुवाक्यानि लिखत*** **5 x 1 = 5m**

| | | |
|---|---|---|
| वथं | ग्रामं | गमिष्यन्ति |
| यूथं | समाधानं | करिष्यन्ति |
| ते | पाकं | पठिष्यामः |
| ताः | सत्यं | वदिष्यन्ति |
| देवाः | देवालयं | लेखिष्यथ |

Visit CollegeDekho